# Vedapurushaproktam Shivatattvopadesham

# વેદપુરુષપ્રોક્તં શિવતત્ત્વોપદેશમ્

## Document Information

Text title : Vedapurushaproktam Shivatattvopadesham

File name : vedapuruShaproktaMshivatattvopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 24| 399-419||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 16, 2024

*sanskritdocuments.org*

# વેદપુરુષપ્રોક્તં શિવતત્ત્વોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

વેદપુરુષઃ

યો વેદાદૌ સ્વરઃ પ્રોક્તો વેદાન્તે ચ પ્રતિષ્ઠિતઃ ।
તસ્ય પ્રકૃતિલીનસ્ય યઃ પરઃ સ મહેશ્વરઃ ॥ ૩૯૯॥

નાન્યો મહેશ્વરો જ્ઞેયો રૂઢ એવ સ શઙ્કરઃ ।
સ પરઃ સર્વદેવેષુ દ્વિજા ધ્યેયઃ સ એવ હિ ॥ ૪૦૦॥

સર્વકર્તા સર્વસાક્ષી શિવ એવ મહેશ્વરઃ ।
સત્યમેતત્પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ॥ ૪૦૧॥

સર્વશ્રુતિશ્રુતો નિત્યઃ સામ્બ એવ મહેશ્વરઃ ।
સત્યમેતત્પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ॥ ૪૦૨॥

સર્વશ્રુતિશ્રુતો નિત્યોઃ રુદ્ર એવ મહેશ્વરઃ ।
સત્યમેતત્પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ॥ ૪૦૩॥

સર્વશ્રુતિશ્રુતો નિત્યઃ સોમ એવ મહેશ્વરઃ ।
સત્યમેતત્પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ॥ ૪૦૪॥

સર્વશ્રુતિશ્રુતો નિત્યસ્ત્ર્યક્ષ એવ મહેશ્વરઃ ।
સત્યમેતત્પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ॥ ૪૦૫
સર્વશ્રુતિશ્રુતો નિત્યઃ સ્થાણુરેવ મહેશ્વરઃ ।
સત્યમેતત્પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ॥ ૪૦૬॥

સર્વશ્રુતિશ્રુતો નિત્યઃ શમ્ભુરેવ મહેશ્વરઃ ।
સત્યમેતત્પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ॥ ૪૦૭॥

સર્વશ્રુતિશ્રુતો નિત્યઃ શર્વ એવ મહેશ્વરઃ ।
સત્યમેતત્પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ॥ ૪૦૮॥

સર્વશ્રુતિશ્રુતો નિત્યો ભવ એવ મહેશ્વરઃ ।
સત્યમેતત્પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ॥ ૪૦૯॥

સર્વશ્રુતિશ્રુતો નિત્યઃ ઉગ્ર એવ મહેશ્વરઃ ।
સત્યમેતત્પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ॥ ૪૧૦॥

પ્રાગ્વિશ્વાધિકો રુદ્રો વિશ્વં વિષ્ણ્વાદિકં જગત્ ।
ન રુદ્રાદધિકઃ કોઽપિ તસ્માત્સ પર ઉચ્યતે ॥ ૪૧૧॥

યઃ સોમોઽજનયદ્વિષ્ણું સ વિષ્ણોરધિકસ્તતઃ ।
વિષ્ણ્વાદિજનકઃ સોમઃ સર્વદેવાધિકો ધ્રુવમ્ ॥ ૪૧૨॥

યો વૈ રુદ્રઃ સ ભગવાનન્યો ન ભગવાન્ધ્રુવમ્ ।
સત્યમેતત્પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ॥ ૪૧૩॥

ધ્યેયો મુક્ત્યર્થિભિર્નિત્યં શિવ એકઃ શિવઙ્કરઃ ।
સત્યમેતત્પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ॥ ૪૧૪॥

નિધનેત્યાદિભિઃ કાર્યં શિવલિઙ્ગાર્ચનં દ્વિજૈઃ ।
શિવલિઙ્ગસ્વરૂપેણ યતસ્તિષ્ઠતિ શઙ્કરઃ ॥ ૪૧૫॥

શિવસ્યૈવાર્ચનં કાર્યં લિઙ્ગરૂપસ્ય વૈદિકૈઃ ।
અન્યથા નરકં યાન્તિ સત્યમેવોચ્યતે મયા ॥ ૪૧૬॥

યો વૈ રુદ્રઃ સ ભગવાન્ સ વિશ્વાધિક ઉચ્યતે ।
મહેશ્વરઃ સ એવેતિ જ્ઞાત્વા પૂજ્યો મહેશ્વરઃ ॥ ૪૧૭॥

મહેશ્વરમુમાકાન્તમનન્યસદૃશં પ્રભુમ્ ।
યોઽન્યતુલ્યતયા વેત્તિ સ ચણ્ડાલ ઇતિ સ્મૃતઃ ॥ ૪૧૮॥

ઈશાનઃ સર્વવિદ્યાનામિત્યાદ્યૈર્વચનૈર્મયા ।
ધ્યેયઃ શઙ્કર એવેતિ નિશ્ચિતં બહુધા પુરા ॥ ૪૧૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વેદપુરુષપ્રોક્તં શિવતત્ત્વોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૪। ૩૯૯-૪૧૯॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 24 . 399-419..

Proofread by Ruma Dewan

*Vedapurushaproktam Shivatattvopadesham*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*